StudentBounty.com

# माध्यमिक शिक्षा बोर्ड राजस्थान, अजमेर

## नमूने का प्रश्न–पत्र

कक्षा– वरिष्ठोपाध्याय

विषय– निम्बार्क दर्शन

अनुक्रमांक ☐☐☐☐☐☐

समयः 3.15 होराः पूर्णांक 80

* परिक्षार्थिभ्यः सामान्यनिर्देशाः *

(i) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्क : अनिवार्यतः लेख्यः।

(ii) सर्वे प्रश्नाः अनिवार्याः संस्कृतमाध्यमेन समाधेयाश्च सन्ति।

(iii) प्रत्येकं प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम्।

(iv) प्रत्येकं प्रश्नभागस्योत्तरं क्रमानुसारमेकत्रैव लेखनीयम्।

---

1. गोपालस्तवराजः कस्मान्मूलग्रन्थादुद्धृतः कश्च तस्योपदेष्टा ? 1

2. कृष्णस्य ''दारिद्र्यभंजनः'' इति नाम कथं प्रसिद्धम् ? 1

3. कैः पुष्पैर्वनमाला निर्मीयते या श्रीहरेर्विभूषणं भवति। 1

4. द्वैताद्वैतपदे कीदृशः समासः ? 1

5. वेदान्ततत्त्वसुधा कस्यस्तोत्रस्य व्याख्यास्ति? कश्च व्याख्याकारः ? 1

6. ''महारथः'' इत्यस्य लक्षणं प्रस्तूयताम्। 1

7. निम्नलिखितवाक्ययोरेकस्य संस्कृतेऽनुवादः क्रियताम्। 2

   (क) सत्संगति विन जो भजन, लहै न सुख की सीर।

   (ख) सब जीवनि में हरिवसे, हरि ही में सब जीव।

8. अधोनिर्दिष्टयोः पद्ययोरेकस्य हिन्द्यां भावार्थं लिखत। 2

   (क) गर्भवास जठरा जरनि, जिनि हरि लीन्हो राखि।

   ''परसा'' हरि न विसारिये, सुमिरि सदा गुण साखि।।

   (ख) रामकृष्ण हरि नाम में भेद अभेद न कोय।

पार करज को ''परशुराँ'' पोत भये प्रभु सोय।।

9. पटलोक्तपद्धत्या त्रयोदशाक्षरो गोपालमन्त्र उद्धिृयताम्। 2

10. ''द्वैतम्'' इति पदस्य व्युत्पत्तिप्रदर्शनपूर्वकमर्थं लिखत। 2

11. सर्वं हि विज्ञानमिति पद्यं पूरयित्वा त्रिरुपता का ? इति दर्शयत। 2

12. जगति ब्रह्मणस्तादात्म्यं सोदाहरणं स्पष्टयत। 2

13. ''स्थेमसृष्टिलयमोक्षकारणम्'' अस्य पदस्य सविग्रहं समासः क्रियताम्। 2

14. नियमानन्दस्य ''निम्बार्कः'' इति नाम कथं प्रसिद्धम् ? 2

15. षोडशोपचार पूजाविधौ भगवते मधुपर्क समर्पणमन्त्रान् लिखत। 3

16. निम्नांकितेषु गोपालनामसु द्वयोष्टिप्पणिः क्रियताम्। 3

(क) यमलार्जुनमुक्तिदः (ख) रजकक्षयकारकः

(ग) मुरारिः (घ) चतुर्वर्गफलप्रदः

17. निम्बार्काचार्यस्य मन्त्रोपदेष्टा गुरुः क आसीत् ? तेन कुतोऽधिगतः समन्त्रः। 3

18. भेदाभेदसिद्धान्ते भेदः भावरुपोऽभावरूपो वेति निरुपयत। 3

19. द्वैताद्वैतविवेक ग्रन्थस्य रचयितुः परिचयः संक्षेपेण प्रस्तूयताम्। 4

20. अधोलिखितयोः पद्ययोरेकस्य ससन्दर्भं व्याख्या विधीयताम्। 4

(क) नवीन नीरदश्यामं नीलेन्दीवरलोचनम्।

वल्लवीनन्दनं वन्दे कृष्णं गोपालरूपिणम्।।

(क) वेणुवाद्यमहोल्लास कृतहुंकारनिःष्वनैः।

सवत्सैरुन्मुखैः शश्वद्गोकुलैरभि वीक्षितम्।।

21. जन्मकर्मगुणरूपयौवनं दिव्यमेव कवयो वदन्ति हि। 4

श्रौतवाद उपलभ्यते तथा निर्विशेषचिति मंगलालये।।

पद्यमिदं ससन्दर्भव्याख्यायताम्।

अथवा

सत्प्रसंगबललभ्यभक्तितो लभ्य एव रसमूर्तिमान् भवान्।

StudentBounty.com

StudentBounty.com

सन्मुखा ननु भवन्ति ये न ते, ते नियन्ति निरमान् विपद्गणान्।।

अस्य पद्यस्य सभ्यग् व्याख्या क्रियताम्।

22. भेदाभेदपदार्थे सामानाधिकरण्य व्याघातं दर्शयित्वा तत्परिहारः क्रियताम्। 6

अथवा

''उभयव्यपदेशात्त्वहिकुण्डलवत्'' इति सूत्रं द्वैताद्वैतमतानुरूपं व्याख्यायताम्।

23. द्वैताद्वैतविवेकानुसारं जीवेश्वरयोः स्वरूपं प्रतिपादयत। 6

अथवा

ग्रन्थोक्तदिशा ''अप्राकृततत्त्वम्'' विवेचयत।

24. निम्नांकितश्लोकेषु द्वयोर्व्याख्या विधेया। 3+3=6

(क) निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दनः।।

पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः।।

(ख) देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।

तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति।।

(ग) यावानर्थ उदपाने सर्वतः सम्प्लुतोदके।

तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः।।

(घ) यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।

स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।

25. अधोलिखितासु सूक्तिषु द्वयोः प्रसंगव्याख्या विधीयताम्। 4+4=8

(क) हरि पूज्याँ पूजै सबै, जीव जन्तु कुलदेव।

''परशुरौ'' हरिसेवताँ सफलभई सबसेव।।

(ख) वगुलोबीणै मच्छिका फिरि फिरिभव जलमाहिं।

मानसरोवर ''परशुराँ'' हंसमुकत फल खाहिं।।

(ग) कनक कलश अमृत भर्यो दियो अन्ध के हाथि।

आखडि डार्यो अस पै ''परसा'' गयो अकाथि।।

(घ) सत युग में तप आचरन त्रैता जपि उपचार।

द्वापर पूजा ''परशुराँ'' कलिकीर्तन में सार।।

StudentBounty.com

26. निम्नांकितेषु पद्येषु द्वयोरेव व्याख्या विधीयताम्। 4

(क) गुरु थापे सो थापिये, ऊँचा हो या नीच।

जाके मस्तक ''परशुराम'' वैसे आवत मीच।।

(ख) जहं संजम आहारको तहं न उपजे रोग।

मन के संजम ''परशुराँ'' मिटै विधन बल भोग।।

(ग) विरह अगनि तनमन जलै जल बिन जीवै न मीन।

हरिप्रीतम विन ''परशुराँ'' दुखी पुकारै दीन।।

(घ) ''परसा'' मानै सत्यकरि गुरु पूज्याँ गोविन्द।

साखी है या बात को वृन्दावन को चन्द।।

StudentBounty.com

## उत्तरतालिका

## निम्बार्कदर्शनम्

पूर्णांक – 80

1. गोपालस्तवराजः नारदपंचरात्रग्रन्थादुधृतः, तस्योपदेष्टा देवर्षिनारदो वर्तते। 1

2. भक्त सुदाम्नस्तत्सदृशानामन्येषां च दारिद्रयं दूरीकृत्य ऐश्वर्यप्रदानात् श्रीकृष्णस्य दारिद्रयभज्जनः इति नाम प्रसिद्धम्। 1

3. तुलसी, कुन्द, मन्दार, करवीर, कमलपुष्पैर्ग्रथिता माला वनमाला कथ्यते। सा च भगवतो विभूषणं भवति। 1

4. ''द्वैताद्वैतपदे ज्ञेयः समासः कर्मधारयः, इति पूर्वाचार्योक्तेः द्वैताद्वैतपदे द्वैतं च तदद्वैतमिति कर्मधारयसमासो निश्चीयते। 1

5. वेदान्ततत्त्वसुधा सविशेषनिर्विशेषकृष्णस्तवराजस्य व्याख्याऽस्ति। व्याख्याकारश्च वेदान्तनिधिः पं. श्री किशोरदास आसीत्। 1

6. महारथ इत्यस्य लक्षणमस्ति – एकोदशसहस्राणि योधयेद्यस्तुधन्विवाह शस्त्र शास्त्र प्रवीणश्च महारथ इति स्मृतः। 1

7. (क) सत्संगतिं विना यो हरिं भजते ससुखं साफल्यं च न लभते। 2

   (ख) सर्वेषु जीवेषु हरिः (अन्तर्यामित्वेन) वसति, जीवाश्च हरौ निवसन्ति। 2

8. (क) प्रस्तुत पद्य में आचार्य परशुरामदेव जी कहते हैं – जिन हरि भगवान ने जीवों को गर्भवास में जठराग्नि के जलन से रक्षा की उन परम कृपालु श्री हरि को कभी मत भूलना, उनके दया– दाक्षिण्य – सर्वज्ञतादिगुणों को ध्यान में रखकर सदा सर्वदा स्मरण करते रहना चाहिए। 2

   (ख) प्रस्तुत पद्य में परशुराम सागर के रचयिता आचार्य कहते हैं – हे साधको! भगवान् श्री हरि के राम या कृष्ण इत्यादि नामों में कोई भेद नहीं है अर्थात् गुण शक्ति में कोई न्यूनाधिक्य नही हैं। दोनो अवतार पूर्णब्रह्म रूप हैं। असंख्य जीवो को जो शरणापन्न होते हैं उन्हें संसार सागर से पार करने के लिए नौका अथवा जहाजतुल्य बने हुए है।

9. कामं मायां च लक्ष्मीं च दशार्णं च तत् परम्। त्रयोदशार्णो मन्त्रो वै प्रोक्तः सर्वसमृद्धिदः। इति वचनात् क्लीं इति कामबीजम्, ह्रीं इति मायाबीजम् श्रीं इति लक्ष्मीबीजम्। एतैस्त्रिभिः बीजैर्युक्तो दशाक्षरः अर्थात् ''क्ली, ह्रीं श्रीं'' गोपीजनवल्लभाय स्वाहा इति सर्वसमृद्धिदः त्रयोदशाक्षरो गोपालमन्त्रः उक्तः ? 2

10. द्वाभ्यां प्रकाराभ्यां इतम् इत्यर्थे द्वि पूर्वक इण् धातोः ज्ञानार्थे क्त प्रत्यये–द्वीतम् इति। द्वीतमेव इत्यर्थे स्वार्थिके तद्धितें अणि आदिवृद्धौ स्वादिकार्ये ''द्वैतम्'' इति पदं निष्पद्यते। अत्र

द्विशब्दोऽनेकार्थस्य वाचकः अतः चित् अचित् ईश्वर इत्यनेकैः प्रकारैः ज्ञातं वस्तु द्वैत विलक्षणम् अद्वैतम् इति। 2

StudentBounty.com

11. सर्व हि विज्ञानमतो यथार्थकं श्रुति स्मृतिभ्यो निखिलस्य वस्तुनः ब्रह्मात्मकत्वादितिवेदविन्मतं त्रिरुपताऽपि श्रुति सूत्र साधिता।। 2

अत्र त्रिरुपता चित्स्वरुपो जीवः अचित्स्वरुपा प्रकृतिः, ईश्वररुपं ब्रह्म च स्वरुपतस्त्रयाणां भिन्नत्वेऽपि ब्रह्मात्मकत्वेनाभिन्नत्वमिति सिद्धान्तः।

12. यथा घटे मृत्तिका तादात्म्यरुपा, कुण्डले सुवर्णस्तादात्म्यरूप, वस्त्रे तन्तवः तादात्म्यरुपाः, अहि कुण्डलादौ सर्पस्तादात्म्य–रुपेण वर्तते तथैव जगत्प्रपंचे ब्रह्म निमित्तोपादानभूतं तादात्म्य रुपेण व्याप्नोति। 2

13. स्थेमश्च सृष्टिश्च लयश्च मोक्षश्च इति विग्रहे ''चार्थे द्वन्द्वः'' इति सूत्रेण समासे कृते स्थेमसृष्टिलयमोक्षाः तेषां कारणमिति विग्रहे ''षष्ठी'' इति सूत्रेण तत्पुरुष समासो विधीयते। अतोऽस्मिन् पदे द्वन्द्वगर्भिततततत्पुरुष समासो ज्ञेयः। 2

14. नियमानन्दो यदा स्वाश्रमे सेवा निरत आसीत् तदैको यतिरतिथिरुपेण समागतवान्। तेन सह वार्ताकरणे सूर्योऽस्तं गतः। भोजनाय यदाऽतिथिर्निमन्त्रितः तदा स उवाच सूर्यास्ते जाते नाहं भोजनं करोमि। नियमानन्देन निम्बवृक्षोपरि सूर्य बिम्बं दर्शयित्वा यतिं भोजयामास। यतिनोक्तं रात्रौ निम्बे अर्को दर्शितः अतः परं तव नाम ''निम्बार्कः'' भविष्यति। सयति ब्रह्मासीत्। तदा प्रभृति नियमानन्दस्य निम्बार्क इति नाम प्रसिद्धं जातम्। 2

15. षोऽशोपचार पूजाविधौ – भगवते मधुपर्कसमर्पणमन्त्राः 3

(i) मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः।

(ii) मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः। मधुद्यौरस्तुनः पिता।

(iii) मधुमान्नोवनस्पतिर्मधुमाँ अस्तु सूर्यः। माध्वीर्गावोभवन्तुनः।

इति मन्त्रैर्मधुपर्कं समर्प्यते।

16. (क) यदा माता यशोदा श्री कृष्णं दाम्ना ऊखले बबन्ध, तदा स ऊखलं कर्षन अर्जुन वृक्षयोर्मध्ये प्राप, वृक्षौ च भग्नौ। ततो देवरुपिणौ द्वौ पुरुषौ समुत्थितौ। पूर्व कुबेर पुत्रौं नलकूवर मणिग्रीव नामानौ नारदशापात् वृक्षौ बभूवतुः कृष्णेन शापान्मोचितौ। अतो गोपाल कृष्णस्य यमलार्जुनमुक्तिदः इति नाम प्रसिद्धम्। 1½+1½=3

(ख) रजकक्षयकारकः – कृष्णबलरामौ गोपैः सह मधुपुर्याः शोभां पश्यन्तौ राजमार्गे अगच्छताम् तत्रैको रजको राजवस्त्राणि आदाय गच्छन् आसीत्। कृष्णेन वस्त्राणियाचितानि, किन्तु स न ददौ। तेन रुष्टः श्री कृष्णस्तंरजकं करेण जघान। ततो गोपालस्य नाम रजकक्षयकारकः इति प्रसिद्धम्।

StudentBounty.com

(ग) मुरारिः – मुरनामको दैत्यः भौमासुरस्य सेनापतिरासीत्। भौमासुरेण सह युद्धप्र
कृष्णः सेनापतिं मुरदैत्यं पूर्वं प्रातयामास। अतः श्री कृष्णस्य ''मुरारिः'' इति नाम प्रसिद्धम्।

(घ) चतुर्वर्गफलप्रदः – भगवान् श्री कृष्णो भक्तानामभीष्टफलदाय कोऽस्ति। यः साधकः ''अकामः'' सर्वकामो वा मोक्षकाम उदारधीः, इति भावनया कृष्णं भजते सः तस्मै सर्वं ददाति। मनुष्य जीवने धर्म–अर्थ–काम–मोक्ष इति चतुर्विधपुरुषार्थानामति महत्वं वर्तते। भगवान् यथाधिकारं फलं ददाति। अतस्तस्य चतुर्वर्गफलप्रदः इति नाम प्रसिद्धम्।

17. आद्यनिम्बार्काचार्येण –स्वगुरोर्देवर्षिनारदाद गोपालाष्टादशाक्षरमन्त्रस्य दीक्षोपदेशः प्राप्तः। नारदेन सनकादि कुमारेभ्यः तैश्च भगवतो हंसनानारायणाल्लब्धः। तथाह नारायणमुखाम्भोजान्मन्त्रस्त्वष्टादशाक्षरः। आविर्भूतः कुमारैस्तु गृहीत्वा नारदाय वै। उपदिष्टः स्वशिष्याय निम्बार्काय च तेन वै। एवं परम्परा प्राप्तोमन्त्रास्त्वटा दशाक्षरः इति। 3

18. अत्रेदं विचार्यते यद् भेदाभेद सिद्धान्ते भेद पदार्थो भावरुपोऽभावरुपो वा सम्मत इति । न च भेदस्याभावतयैव प्रसिद्धत्वा तथैव मन्तव्यमिति वाच्यम् यादृश भेदस्य अभावरुपेणप्रसिद्धिः – घटः पटो न पटः घटोनेत्यादि, तादृश भेदस्य प्रकृते निराकृतत्वात्। अतः स भेदपदार्थो भेदा भेदवादिनां मते भावरुप एव स्वीकृतः इत्यादि। 3

19. 4

20. 4

21. 4

22. 6

23. 6

24. 6

25. 8

26. 8